শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ১৬

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ১৬

*নরনারাযণাৱতারৱর্ণনং দক্ষযাগৱর্ণনং চ*

দক্ষো ৱিরিঞ্চতনযোথ মনোস্তনূজাং
    লব্ধ্ৱা প্রসূতিমিহ ষোডশ চাপ কন্যাঃ।
ধর্মে ত্রযোদশ দদৌ পিতৃষু স্ৱধাং চ
    স্ৱাহাং হৱির্ভুজি সতীং গিরিশে ত্ৱদংশে॥ ১ ॥

মূর্তির্হি ধর্মগৃহিণী সুষুৱে ভৱন্তং
    নারাযণং নরসখং মহিতানুভাৱম্।
যজ্জন্মনি প্রমুদিতাঃ কৃততূর্যঘোষাঃ
    পুষ্পোৎকরান্ প্রৱৱৃষুর্নুনুৱুঃ সুরৌঘাঃ॥ ২ ॥

দৈত্যং সহস্রকৱচং কৱচৈঃ পরীতং
    সাহস্রৱৎসরতপস্সমরাভিলৱ্যৈঃ।
পর্যাযনির্মিততপস্সমরৌ ভৱন্তৌ
    শিষ্টৈককঙ্কটমমুং ন্যহতাং সলীলম্॥ ৩ ॥

অন্ৱাচরন্নুপদিশন্নপি মোক্ষধর্মং
    ত্ৱং ভ্রাতৃমান্ বদরিকাশ্রমমধ্যৱাৎসীঃ।
শক্রোথ তে শমতপোবলনিস্সহাত্মা
    দিৱ্যাঙ্গনাপরিৱৃতং প্রজিঘায মারম্॥ ৪ ॥

কামো ৱসন্তমলযানিলবন্ধুশালী
    কান্তাকটাক্ষৱিশিখৈর্ৱিকসদ্ৱিলাসৈঃ।
ৱিধ্যন্মুহুর্মুহুরকম্পমুদীক্ষ্য চ ত্ৱাং
    ভীরুস্তৱযাথ জগদে মৃদুহাসভাজা॥ ৫ ॥

www.prapatti.com

ভীত্যালমঙগজ ৰসন্ত সুৰাঙগনা ৰো
মন্মানসং ত্বিহ জুষধ্বমিতি ব্ৰুৱাণঃ।
ত্বং ৱিস্মযেন পৰিতঃ স্তুৱতামথৈষাং
প্ৰাদৰ্শযঃ স্বপৰিচাৰক কাতৰাক্ষীঃ॥ ৬ ॥

সম্মোহনায মিলিতা মদনাদযস্তে
ত্বদ্দাসিকাপৰিমলৈঃ কিল মোহমাপুঃ।
দত্তাং ত্বযা চ জগৃহুস্ত্ৰপযৈৱ সৰ্ৱ-
স্বৰ্ৱাসিগৰ্ৱশমনীং পুনৰুৰ্ৱশীং তাম্॥ ৭ ॥

দৃষ্টৱোৰ্ৱশীং তৱ কথাং চ নিশম্য শক্ৰঃ
পৰ্যাকুলোজনি ভৱন্মহিমাৱমৰ্শাত্।
এৱং প্ৰশান্তৰমণীযতৰাৱতাৰাত
ত্বত্তোধিকো ৱৰদ কৃষ্ণতনুস্তৱমেৱ॥ ৮ ॥

দক্ষস্তু ধাতুৰতিলালনযা ৰজোন্ধো
নাত্যাদৃতস্তৱযি চ কষ্টমশান্তিৰাসীত্।
যেন ৱ্যৰুন্ধ স ভৱত্তনুমেৱ শৰ্ৱং
যজ্ঞে চ ৱৈৰপিশুনে স্বসুতাং ৱ্যমানীত্॥ ৯ ॥

ক্ৰুদ্ধেশমৰ্দিতমখঃ স তু কৃত্তশীৰ্ষো
দেৱপ্ৰসাদিতহৰাদথ লব্ধজীৱঃ।
ত্বতপূৰিতক্ৰতুৱৰঃ পুনৰাপ শান্তিং
স ত্বং প্ৰশান্তিকৰ পাহি মৰুতপুৰেশ॥ ১০ ॥

**********



www.prapatti.com